र्यमेज्यादितिधातृभे नगाः" मासोऽजवैश्वेऽथ यमाहि मूलभे मिश्रेशपित्र्ये फणिदंशने मृतिः। मु० चि०

"स्वातीति। इन्द्रो ज्येष्ठा पूर्वास्तिस्रः शिव आर्द्रा सार्पभम् अश्लेषा। एषु भेषु ज्वरे पुंसः स्त्रियो वा ज्वरोत्पत्तौ मृतिरेव स्यात् उक्तञ्च वसिष्ठेन" "पूर्वात्रयस्वातिभुजङ्गरौद्रशुरेश्वरर्क्षेषु च यस्य रोगः। स्याद्रक्षितं देवचिकित्सकोऽपि चितावशक्तः खलु रोगिणं तम्" देवचिकित्सको देववैद्यो धन्वन्तरिः। अथान्त्यमैत्रे रेवत्यनुराधयोर्ज्वरोत्पत्तौ रुजो रोगस्य स्थिरता भवेत् बहुकालेन रोगनिवृत्तिः स्यादित्यर्थः। तथा भरण्यादिनक्षत्रचतुष्के शिवा एकादश घस्रादिवसाः रोगस्थैर्यं स्यात्तदनन्तरं रोगमुक्तिरिति सर्वत्र व्याख्येयम्। द्व्यधिपं विशाखा अर्को हस्तः वासवं धनिष्ठा एषु त्रिषु भेषु पक्षः पञ्चदश दिवसा रोगस्थैर्यस्य। मूलाग्निदास्रे मूलकृत्तिकाश्विनीषु त्रिषु नव दिवसाः पित्र्यभे मघायां नखा विंशतिर्दिवसाः नामैकदेशे नामग्रहणमिति न्यायेन बुध्न्योऽहिर्बुध्न्य उत्तराभाद्रपदा अर्यमोत्तराफाल्गुनी। ईज्यादितिधातृभानि प्रसिद्धानि एषु पञ्चसु भेषु नगाः सप्त दिवसाः। अजवैश्वे मृगोत्तराषाढयोर्द्वयोर्मासस्त्रिंशद्दिनानि रोगस्थैर्यं ततो रोगनिवृत्तिः यदाह "कृच्छ्रात् स्फुटं प्राणिति मित्रपौष्णे धिष्ण्ये च मासाच्छशिविश्वधिष्ण्ये। रोगस्य मुक्तिः पितृदेवधिष्ण्ये वारैर्भवेद्विंशतिभिश्च नूनम्" प्राणिति जीवतीत्यर्थः। "पक्षाद्वसुद्वीशकरेषु भेषु मूलाश्विनाग्नित्रितये नवाहात्। तोयेशचित्रान्तकविष्णुभेषु नैरुज्यमेकादशभिर्दिनैश्च। पुष्ये त्वहिर्बुध्न्य पुनर्वसौ च अश्न्यार्यमर्क्षेषु च सप्तरात्रात्।

अत्र शीघ्रं रोगविमुक्तये संक्षिप्ता शान्तिरप्यभिहिता वसिष्ठेन "ऋक्षेशरूपं कनकेन कृत्वा तल्लिङ्गमन्त्रैश्च सुगन्धिपुष्पैः। वस्त्राक्षतैर्गुग्गुलुधूपदीपनैवेद्यताम्बूलफलैश्च सम्यक्। पूजां च कृत्वामयनाशनाय द्विजाय दद्यादतुलं शिवाय" आमयो रोगः। अतुलमपरिमितद्रव्यम् प्रत्येकनक्षत्रशान्तिर्विशदा नक्षत्रशान्त्यध्याये वसिष्ठेनोक्ता सा तत एव समवधार्या"।

भैषज्यर० अन्यथा तद्रोगकाल उक्तो यथा

"कृत्तिकायां यदा व्याधिरुत्पन्नो भवति स्वयम्। नवरात्रं भवेत् पीड़ा त्रिरात्रं रोहिणीषु च। मृगशीर्षे पञ्चरात्रमार्द्रायां मुच्यतेऽसुभिः। पुनर्वसौ तथा पुष्ये सप्तरात्रेण मोचनम्। नवरात्रं तथाऽश्लेषे श्मशानान्तं मघासु च। द्वौ मासौ पूर्वफल्गुन्यामुत्तरासु त्रिपञ्चकम्। हस्ते च सप्तमे मोक्षश्चित्रायामर्द्धमासकम्। मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिः। मित्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम्। मूलेन जायते मोक्षः पूर्वाषाढ़े त्रिपञ्चकम्। उत्तरे दिनविंशत्या द्वौ मासौ श्रवणे तथा। धनिष्ठायामर्द्धमासो वारुणे च दशाहकम्। पूर्वभाद्रपदे देवि! ऊनविंशतिवासरान्। त्रिपक्षञ्चाहिर्बुध्न्ये च रेवत्यां दशरात्रकम्। अहोरात्रं तथाश्विन्यां भरण्यान्तु गतायुषः। एवं क्रमेण जानीयान्नक्षत्रेषु यथोचितम्"।

रोगिणस्ताराशुद्ध्यशुद्धिभ्यां भोगकालभेदव्यवस्था।

तिथिनक्षत्रवारयोगभेदे ज्वरोत्पत्तौ मु० चि मृत्युरुक्तो यथा।

"रौद्राहिशाक्राम्बुपयाम्यपूर्वाद्विदैववस्वग्निषु पापवारे। रिक्ताहरिस्कन्ददिने च रोगे शीघ्रं भवेद्रोगिजनस्य मृत्युः" मु० चि०।

"रौद्रादीनि भानि प्रसिद्धानि पापवाराः सूर्यभौमशनयः रिक्ताः प्रसिद्धाः हरिर्द्वादशी स्कन्ददिनं षष्ठी एतास्तिथयः एवंविधे विशिष्टयोगे यस्य रोगोत्पत्तिर्भवेत्तस्य रोगिजनस्य शीघ्रं मृत्युर्भवेत्। उक्तं च दैवज्ञमनोहरे "उरगवरुणरुद्रावासवेन्द्रत्रिपूर्वायमदहनविशाखाः पापवारेण युक्ताः। तिथिषु नवमिषष्ठीद्वादशी वा चतुर्थी सहजमरणयोगो रोगिणां कालहेतुः" इति चतुर्थीग्रहणं चतुर्दश्युपलक्षकं मत्वा मूले रिक्ताग्रहणं कृतम् अतएवाह वसिष्ठः "अश्लेषार्द्रात्रिपूर्वायमवरुणमरुच्छक्रतारानलाः स्युर्द्वादश्यां स्कन्दरिक्तातिथिषु च रविजाकारवारेषु येषाम्। रोगः संजायते ते यमपुरमचिरात् प्राप्नुवन्त्येव चन्द्रे जन्मन्यष्टाख्यबन्ध्वव्ययभवनगते मृत्युलग्ने च राशाविति" पी० धा०।

अस्य प्रतिप्रसवः "यद्यत्र चन्द्रस्तस्यैव गोचरे चाशुभप्रदः। तदा नूनं भवेन्मृत्युः सुधासंसिक्तदेहिन"। इति दीपिकाटीकाधृतवाक्यम्।

२ज्वराधिष्ठातृदेवभेदे च रौद्रज्वरदेवस्य वैष्णवज्वरदेवेन युद्धादिकथा हरिवं० १८१ अ०

"भज्यमानेष्वनीकेषु त्रातुकामः समभ्ययात्। ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः। भस्मप्रहरणो रौद्रः कालान्तकयमोपमः। नदन्मेघसहस्रस्य तुल्यो निर्घातनिस्वनः। निश्वसन् जृम्भमाणश्च निद्रान्विततनुर्भृ-